प्रथमः पाठः

१

# अहमस्मि भारतस्य संविधानम्



(स्थानम्–संविधान-सदनस्य (पुरातन-संसद्-भवनस्य) केन्द्रीयकक्षः। छात्राः गौरवपूर्णं वातावरणं पश्यन्ति वार्तालापं च कुर्वन्ति।)

गार्गी – (आश्चर्येण) सखि यशिके! पश्य, एतदेव तत् पावनं 'संविधान–सदनम्'। अत्रैव अस्माकं राष्ट्रस्य भाग्यविधातॄणां सभा अभवत्, यत्र भारतस्य 'आत्मा' संविधानरूपेण आकारं प्राप्तवान्।

यशिका – सत्यं वदसि गार्गि! पश्य पुरतः स्थापितं 'संविधान-ग्रन्थम्'।

अथर्वः – अहो! एषः ग्रन्थः स्वस्य विषये वक्तुम् इच्छति इव।


श्रेया – अहो आश्चर्यम्, अहमपि शृणोमि ग्रन्थस्य वाणीम्।

पावनी – सर्वे तूष्णीं स्थित्वा शृण्वन्तु!

अयि भोः बालाः! अहमस्मि संविधानम्, भारतस्य आत्मा, अस्य राष्ट्रस्य नियमसंहिता जीवनमार्गदर्शकः च। न्यायः स्वतन्त्रता समता बन्धुता च इति चतुर्भिः आधारस्तम्भैः अहं राष्ट्रस्य लोकतन्त्रं सुदृढं करोमि। राष्ट्रस्य एकतायाः अखण्डतायाः न्यायस्य शान्तेः च स्थापना एव मम मूलं लक्ष्यम्। अतः अहमस्मि राष्ट्रचेतनायाः प्रतिरूपम्। प्राचीनभारतीयग्रन्थेषु प्रतिपादिताः उदात्ताः विचाराः प्रतिपदं मयि समाहिताः। यथा —

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते॥**

अहम् अस्मि आधारः लोकतन्त्रात्मकस्य अस्य भारतस्य। विधायिका कार्यपालिका न्यायपालिका चेति मम त्रीणि अङ्गानि। अहं विधायिकया नीतीनां निर्माणं कारयामि। अहं कार्यपालिकया नीतीनां क्रियान्वयनं कारयामि। अथ च अहं न्यायपालिकया प्रजान्यायस्य प्रजाधिकाराणां रक्षां कारयामि। जनपदन्यायालयाः उच्चन्यायालयाः उच्चतमन्यायालयः इति न्यायपालिकायाः संरचना। सर्वजनहितं सर्वजनसुखं च मम परमं ध्येयम्। अहं कालानुगुणं सन्दर्भानुगुणम् आवश्यकतानुगुणं च संशोधनैः नित्यनूतनं भवामि। अहं विश्वस्य सुदृढं बृहत्तमं च लिखितसंविधानम् अस्मि। "सर्वमतसमभावः" इत्येव मम परमो भावः। सर्वेऽपि भारतीयाः मम दृष्टौ समानाः। सामाजिक-आर्थिक-राजनैतिक-न्यायः मम मन्त्रः। विचाराभिव्यक्तौ



उपासनापद्धतेः स्वीकरणे च स्वातन्त्र्यस्य अहं पोषकः। प्रतिष्ठायाः अवसरस्य च समता मम दृष्टिः। व्यक्तिगरिमा राष्ट्रियैकता च मम हृदयस्य अन्तर्भूतौ भावौ।

मित्राणि ! अहं मौलिकाधिकारान् अपि बोधयामि येन सर्वे सगौरवं स्वस्व जीवनं यापयन्ति। अहं वैधानिक–उपचाराधिकारेण (अनु. ३२) प्रजाः रक्षामि। "उदारचरितानां तु वसुधैव कुटुम्बकम्" इति भावनया सर्वेषां नागरिकाणाम् उन्नतिः मम अभीष्टा। अहमेव केन्द्रसर्वकाराय राज्यसर्वकारेभ्यश्च अधिकारान् प्रयच्छामि। अहं संसदीय–शासनपद्धतिं प्रवर्तयामि। जनाः स्वप्रतिनिधीन् चित्वा संसदि प्रेषयन्ति। अस्यां व्यवस्थायां प्रजाः एव प्रमुखाः भवन्ति। श्रेष्ठानां नेतॄणां चयनेन उत्तमसमाजस्य निर्माणं भवितुम् अर्हति, अतः जनमतस्य महत्त्वम् अत्यधिकं वर्तते।

मम एकपञ्चाशत्तमे (क) अनुच्छेदे नागरिकाणाम् एकादश कर्तव्यानि उक्तानि सन्ति। राष्ट्रभक्तिः सामाजिकसमरसता पर्यावरणसंरक्षणं वैज्ञानिकदृष्टिः चेत्यादीनि कर्तव्यानि मम हृदयम्। उत्तमसमाजस्य निर्माणाय राष्ट्रस्य प्रगत्यै च सर्वाः प्रजाः स्वकर्तव्यानि पालयेयुः। सत्यमेव उच्यते "धर्मो रक्षति रक्षितः"। विचारस्वातन्त्र्यस्य लोकतान्त्रिकमूल्यानां च अहं प्रतीकभूतम्। "आ नो भद्राः क्रतवो यन्तु विश्वतः" इति वेदोक्तिम् अहम् अनुसरामि। सर्वे निर्भीकाः स्युः, सर्वत्र सुशासनं स्याद् इति मम कामनाः।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥**

**छात्राः** – जयतु भारतम् ! जयतु संविधानम् !

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| संविधानम् (सम्+वि+√धा +ल्युट्) | सम्यक् विधानम् | संविधान | constitution | |
| नियमसंहिता (षष्ठीतत्पुरुषः) | नियमानां संहिता | नियमों का संग्रह | code of rules | |
| लोकतन्त्रम् (षष्ठीतत्पुरुषः) | लोकानां तन्त्रम् | जनतन्त्र को | democracy | |
| प्रतिपदम् (अव्ययीभावः) | पदं पदं प्रति | प्रत्येक पद में | in every single word / in each word | |
| समाहिताः (सम् +आ+√धा(हि) +क्त) | अन्तर्निहिताः / समाविष्टाः | समाहित / निहित | inherent / included | |
| जीवनमार्गदर्शकः (षष्ठीतत्पुरुषः) | जीवनमार्गस्य दर्शकः | जीवन का मार्ग दिखाने वाला | guide for life's path | |
| संगच्छध्वम् (सम् + √गम् + आत्मने लोट्.) | मिलित्वा गच्छत | मिलकर चलो | may you walk together | |
| संवदध्वम् (सम् + √वद् + आत्मने लोट्.) | एकस्वरेण मिलित्वा वदत | मिलकर एकस्वर से बोलो | speak together | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| वो (वः) युष्मद् शब्दः षष्ठी वि. बहु. | युष्माकम् | आपका | yours | |
| मनांसि (मनस् शब्दः नपुं. द्वितीया वि. बहु.) | चित्तानि | मनों को | minds | |
| संजानानाः (सम्+ √ज्ञा + शानच्. प्रथमा वि. बहु.) | जानन्तः | एक विचार वाले होकर | being amicable / sharing the same ideas | |
| उपासते (उप + √आस् + लट्. प्र. पु. ब. व.) | सेवन्ते | श्रद्धापूर्वक कर्तव्य निर्वहण | devotedly performing duties | |
| विधायिका | विधीनां निर्मात्री सभा | विधि–नियमों का निर्माण करने वाली सभा | legislature | |
| न्यायपालिका | न्यायानां पालयित्री परिषद् | न्यायपालिका | judiciary | |
| नागरिकाणाम् | प्रजानाम् | नागरिकों का | of people | |
| संशोधनैः | परिष्कारैः | संशोधनों के द्वारा | by amendments | |
| लोकतन्त्रात्मकस्य (बहुव्रीहिः) | लोकतन्त्रम् आत्मा यस्य | लोकतन्त्रात्मक का | of democratic | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| निर्भीकाः (पुं. प्र. वि. ए.व.) | भयरहिताः | भय से मुक्त | without fear | |
| निरामयाः (बहुव्रीहिः) | निर्गताः आमयाः येभ्यः ते | रोगमुक्त/स्वस्थ | free from disease | |

## अत्र इदम् अवधेयम्

"संगच्छध्वं संवदध्वम्" इति मन्त्रस्य पदच्छेदम् अर्थम् अन्वयं भावार्थं च अष्टम्याः कक्षायाः पुस्तके पश्यतु।

**संगच्छध्वं संवदध्वम् इति एतयोः आत्मनेपदित्वस्य विचारः**

'गम्'-धातुः वस्तुतः परस्मैपदी अस्ति। किन्तु 'सम्' इति उपसर्गपूर्वकः 'गम्'-धातुः अकर्मकविषये आत्मनेपदी भवति। सकर्मकविषये तु सः परस्मैपदी एव भवति। यथा —

अकर्मकप्रयोगः – पिता पुत्रेण सह संगच्छते।

सकर्मकप्रयोगः – बालः ग्रामं सङ्गच्छति।

संगच्छध्वम् इत्यत्र 'सम्' पूर्वकस्य 'गम्' धातोः प्रयोगः अकर्मकविषये उक्तः, तदर्थम् अत्र सः आत्मनेपदी।

यः कोऽपि उपसर्गः भवतु न वा भवतु 'वद्' धातुः सकर्मकः चेत् परस्मैपदी भवति। अकर्मकः चेत् सः आत्मनेपदी भवति इति एषः सामान्यः नियमः।

अकर्मकप्रयोगः – अध्यापकः कक्षायां वदते।

सकर्मकप्रयोगः – अध्यापकः कक्षायां श्लोकं वदति।

संवदध्वम् इत्यत्र 'वद्'-धातोः प्रयोगः अकर्मकविषये उक्तः, तदर्थम् अत्र आत्मनेपदी प्रयोगः।

© NCERT not to be republished

# अभ्यासाद् जायते सिद्धिः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —**

(क) संविधानस्य चत्वारः स्तम्भाः के सन्ति?

(ख) कार्यपालिका किं करोति?

(ग) कया भावनया नागरिकाणाम् उन्नतिः अभीष्टा?

(घ) संविधानस्य एकपञ्चाशत्तमे (क) अनुच्छेदे कानि तत्त्वानि उक्तानि?

(ङ) संविधानस्य सङ्कल्पना का वर्तते?

**२. अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत —**

वेदोक्तिम्, एकपञ्चाशत्तमे, भद्राणि, संविधानम्, अङ्गानि

(क) अहमस्मि ..................भारतस्य आत्मा।

(ख) विधायिका कार्यपालिका न्यायपालिका चेति मम त्रीणि ......................।

(ग) अहम् 'आ नो भद्राः क्रतवो यन्तु विश्वतः' इति ............... अनुसरामि।

(घ) संविधानस्य ................. अनुच्छेदे नागरिकाणां कर्तव्यानि उक्तानि।

(ङ) सर्वे ................... पश्यन्तु।

**३. प्रदत्तानां विग्रहवाक्यानां समासयुक्तानि पदानि लिखत—**

(क) जीवनस्य मार्गदर्शकः = ............................

(ख) दिनं दिनं प्रति = ............................

(ग) आधारस्य शिला = ............................

(घ) धर्मस्य उपासना = ............................

(ङ) हृदः मन्दिरम् = ............................

(च) संविधानस्य संशोधनम् = ............................

© NCERT not to be republished

४. **अधः रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत —**

(क) अहमस्मि संविधानम्, **भारतस्य** आत्मा।

(ख) **प्राचीनभारतीयग्रन्थेषु** उक्ताः परमोत्कृष्टविचाराधाराः मयि समाहिताः सन्ति।

(ग) संविधानम् **अधिकारैः** सह कर्तव्यानि अपि बोधयति।

(घ) **अहं** विशालराष्ट्रे न्यायस्य समतायाः बन्धुतायाः च पोषकः अस्मि।

५. **अधः प्रदत्तानां पदानां सन्धिविच्छेदं कुरुत —**

(क) भारतस्यात्मा = ........................+ आत्मा

(ख) राष्ट्रियैकता = राष्ट्रिया + ....................

(ग) मौलिकाधिकारान् = ....................................

(घ) सर्वकारस्योपरि = ........................... + उपरि

(ङ) सर्वेऽपि = सर्वे + ...........................

(च) कोऽपि = ....................................

६. **अधोलिखितानि वाक्यानि पठित्वा उचितम् (✓) अनुचितं (✗) वा चिनुत —**

(क) भारतस्य संविधानं विश्वस्मिन् विश्वे बृहत्तमं लिखितसंविधानम् अस्ति। ( )

(ख) विधीनां नीतीनां च निर्माणं विधायिका करोति। ( )

(ग) संविधानं संसदीय-शासनपद्धतिम् प्रवर्तयति। ( )

(घ) भारतस्य संविधानं कदापि संशोधयितुं न शक्यते। ( )

(ङ) संविधाने जनमतस्य महत्त्वं न वर्तते। ( )

(च) संविधानं केवलं केन्द्रसर्वकाराय एव अधिकारान् प्रयच्छति न तु राज्यसर्वकारेभ्यः। ( )

७. **अधः प्रदत्तां स्थितिं पठित्वा प्रश्नस्य उचितं समाधानं चिनुत —**

**स्थितिः** – भवतः/भवत्याः विद्यालये कश्चन नूतनः छात्रः प्रवेशं प्राप्नोति। सः छात्रः अन्यस्मात् राज्यात् अस्ति। तस्य मातृभाषा अपि भिन्ना अस्ति।

**प्रश्नः** – संविधाने वर्णितस्य 'बन्धुता' इति मूल्यस्य आधारेण भवान्/भवती किं करिष्यति?


© NCERT not to be republished

(क) सः विषयः मम सम्बद्धः नास्ति इति त्यक्ष्यामि।

(ख) अहं तेन सह मित्रतां सम्पादयिष्यामि, मम मित्रैः सह अपि तस्य मैत्रीं कारयिष्यामि।

(ग) अहं मम गृहे पितरौ सूचयिष्यामि।

## स्वाध्यायान्मा प्रमदः




© NCERT not to be republished

## मूलकर्तव्यानि (अनुच्छेदः ५१ अ)

१. संविधानस्य आदरः
२. आदर्शानां सम्माननम्
३. एकता अखण्डता च
४. देशस्य रक्षणम्
५. भ्रातृत्वभावना
६. सांस्कृतिकमहत्त्वम्
७. पर्यावरणसंरक्षणम्
८. वैज्ञानिकदृष्टिः
९. सार्वजनिकसम्पत्तिः
१०. उत्कृष्टतायाः प्रयासः
११. शिक्षायाः अवसरः

## यस्तु क्रियावान् मनुजः स विद्वान्

(क) संविधानेन प्रदत्तानाम् अस्माकं मौलिकाधिकाराणां मौलिककर्तव्यानां च स्फोरकपत्राणि निर्माय कक्षायां प्रदर्शयन्तु।

(ख) भारतीयसंविधानस्य अष्टम्याम् अनुसूच्याम् उल्लिखितासु सर्वासु द्वाविंशत्यां (२२) भाषासु भारतीयसंविधानं पठितुम् अधोदत्तस्य जालपुट-सङ्केतस्य क्यूआर-कूटस्य च उपयोगं कुर्वन्तु।

लिङ्क : https://www.legislative.gov.in/documents?page=1

क्यूआर कूटः

स्कैन कुर्वन्तु

(ग) 'वैदिकसूक्ति-संवाद-गोष्ठी'

शिक्षकः श्यामपट्टे सूक्तीः लिखति—

| | |
|---|---|
| "संगच्छध्वं संवदध्वम्..." लोकतान्त्रिकसमता बन्धुता च। | "एकं सद्विप्रा बहुधा वदन्ति" |
| "उदारचरितानां तु वसुधैव कुटुम्बकम्" वैश्विक–कल्याणम्, भ्रातृभावः। | "धर्मो रक्षति रक्षितः" |
| "आ नो भद्राः क्रतवो यन्तु विश्वतः" वैचारिक–स्वतन्त्रता। | "आ नो भद्राः क्रतवो यन्तु विश्वतः" |
| "समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्" समता। | "सर्वं खल्विदं ब्रह्म" |
| "समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि" | "माता भूमिः पुत्रोऽहं पृथिव्याः" |

**छात्र–कार्यम्:** छात्राः लघुसमूहेषु उपविश्य चर्चयन्ति एताः सूक्तयः आधुनिकसंविधानस्य उद्देशिकां कथम् अलङ्कुर्वन्ति। प्रत्येकं समूहः एकैकं वाक्यं संस्कृतेन वदति— यथा, "संगच्छध्वम् इति भावनया समाजे समता आगच्छति।"

© NCERT not to be republished